लुपि [1]इति किम् ? लुकि मा भूत् । लवणः सूपः । लवणा यवागूः । [2]लवणं शाकम्[3] (४.२.२२,२४/१५७२, १५७४) (म. भा. १.२२७) । व्यक्तिवचने इति किम् ? शिरीषाणाम[4]दूरभवो ग्रामः (४.२.७०/१२८२) (४.२.८२/१३०१) [5]शिरीषाः, तस्य वनं शिरीषवनम् (म.भा.१.२२६) । 'विभाषौषधिवनस्पतिभ्यः' (८.४.६/१०५१) इति णत्वं न भवति ।

[१९] हरीतक्यादिषु व्यक्तिः । (म. भा. १.२२८)
हरीतक्याः फलानि हरीतक्यः (४.३.१६७/१४५६) फलानि ।[6]

[२०] खलतिकादिषु वचनम् । (म.भा. १.२२९)
खलतिकस्य पर्वतस्यादूरभवानि वनानि (४.२.७०/१२८२) (४.२.८२/१३०१) [7]खलतिकं वनानि ॥

## विशेषणानां चाजातेः । (५२/१३००)

[8]लुपि इति वर्तते । लुबर्थस्य यानि विशेषणानि तेषामपि [9]च युक्तवद् व्यक्तिवचने भवतः जातिं वर्जयित्वा । पञ्चालाः रमणीयाः, [10]बह्वन्नाः, बहुक्षीर[11]घृताः, बहुमाल्यफलाः । गोदौ रमणीयौ, [12]बह्वन्नौ, बहुक्षीरघृतौ, [13]बहुमाल्यफलौ[14] । अजातेः इति किम् ? [15]पञ्चालाः जनपदः । गोदौ ग्रामः । जात्यर्थस्य [16]चायं युक्तवद्भावप्रतिषेधः । तेन जातिद्वारेण यानि विशेषणानि तेषामपि [17]युक्तवद्भावो न भवति । पञ्चालाः जनपदो रमणीयो, [18]बह्वन्नः । गोदौ ग्रामो रमणीयो, बह्वन्नः इति ।

[२१] मनुष्यलुपि प्रतिषेधो [19]वक्तव्यः । (म.भा. १.२२९)
[20]चञ्चा अभिरूपः । [21]वध्रिका (५.३.९६,९८/२०५१,२०५३) दर्शनीयः (म. भा. १.२२९) ॥

## तदशिष्यं सञ्ज्ञाप्रमाणत्वात् । (५३/१२९५)

तत् इति प्रकृतं [22]युक्तवद्भावलक्षणं निर्दिश्यते । [23]तदशिष्यं न वक्तव्यम् । [24]कस्मात्? सञ्ज्ञाप्रमाणत्वात् । सञ्ज्ञाशब्दा हि नाना[25]लिङ्गसङ्ख्याः [26]प्रमाणम् । पञ्चालाः, वरणा इति [27]च, नैते [28]योगशब्दाः । किं तर्हि? [29]जनपदादीनां सञ्ज्ञा एताः । तत्र लिङ्गं वचनं [30]च [31]स्वभावसंसिद्धमेव न यत्नप्रतिपाद्यम्, यथा आपः, दाराः, गृहाः, सिकताः, वर्षाः इति ॥

## लुब् योगाप्रख्यानात् । (५४/१२९६)

लुबप्यशिष्यः । योऽयं 'जनपदे लुप्' (४.२.८१/१२९३), 'वरणादिभ्यश्च' (४.२.८२/१३०१) इति

1. इति नास्ति ह. 2. लवणं शाकम् नास्ति ह. 3. संसृष्टमित्यनेन विहितस्य ठको लवणाल् लुक् इति लुक् इत्यधिकम् ड. 4. ⁰अदूरे भवः ड. 5. शिरीषः क. 6. हरीतक्यादिभ्यश्च (४.३.१६७/१५४६) इति लुप् इत्यधिकम् ड, वचनं त्वभिधेयवशं इत्यधिकम् अ. 7. खलतिका ग, खलतिकवनानि ह. 8. लुपि लुपि ब. 9. च युक्तवत् नास्ति अ. ब.इ.ग. 10. बह्वन्नाः नास्ति क. 11. ⁰धनाः ब. 12. बह्वन्नौ नास्ति फ. 13. बहुमूलफलौ ह. 14. वृत्तौ इत्यधिकम् फ. 15. उदाहरणमिदं नास्ति ह. 16. अयं नास्ति ह. 17. युक्तवद्भावप्रतिषेधो भवति अ. ड, निषेधो भवति क. 18. बह्वन्नः नास्ति ह. 19. वक्तव्यः नास्ति अ. क. फ. 20. चर्चाभिरूपः ब, चञ्चा नास्ति ह. 21. बह्वीका ब. क, वद्धिका क. 22. युक्तवल्लक्षणं प्रतिनिर्दिश्यते क.ड.फ, भावरूपपं प्रमेयं अ, भाववचनं ह. 23. तदेतदशिष्यं अ. क,अवक्तव्यम् फ. ह. ग. 24. कुतः अ. क. 25. ⁰सङ्गसंख्याः अ. 26. प्रमाणत्वं प्रतिपादकत्वं ड. 27. च नास्ति अ. क. फ. 28. योगजनपदादेः क्षत्रियादिभिः सम्बन्धः तस्याप्रत्याख्यानादनुपलब्धेः इत्यर्थः ड. 29. जनपदानाम् ह. 30. च नास्ति फ. 31. स्वभावत एव फ.